# Brahmasutra

# બ્રહ્મસૂત્રાણિ

## Document Information

Text title : brahma_suutra

File name : brahma_suutra.itx

Category : sUtra, major_works

Location : doc_z_misc_major_works

Transliterated by : Shrisha Rao shrao at dvaita.org

Proofread by : Shrisha Rao shrao at dvaita.org, Sunder Hattangadi sunder at hotmail.com, Dima Muzhetsky dimamuzhetsky at yahoo.com

Latest update : January 27, 2000, Renumbered, corrected May 28, 2009, May 18, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# બ્રહ્મસૂત્રાણિ

ॐ
॥ શ્રી ગુરુભ્યો નમઃ હરિઃ ॐ ॥

॥ શ્રી બાદરાયણાભિધેયશ્રીવેદવ્યાસમહર્ષિપ્રણીતાનિ
શ્રી બ્રહ્મસૂત્રાણિ ॥

## ॥ અથ પ્રથમોઽધ્યાયઃ ॥

ॐ અથાતો બ્રહ્મજિજ્ઞાસા ॐ ॥ ૧.૧.૧ ॥

ॐ જન્માદ્યસ્ય યતઃ ॐ ॥ ૧.૧.૨ ॥

ॐ શાસ્ત્રયોનિત્વાત્ ॐ ॥ ૧.૧.૩ ॥

ॐ તત્તુસમન્વયાત્ ॐ ॥ ૧.૧.૪ ॥

ॐ ઈક્ષતેર્નાશબ્દમ્ ॐ ॥ ૧.૧.૫ ॥

ॐ ગૌણશ્ચેન્નાત્મશબ્દાત્ ॐ ॥ ૧.૧.૬ ॥

ॐ તન્નિષ્ઠસ્ય મોક્ષોપદેશાત્ ॐ ॥ ૧.૧.૭ ॥

ॐ હેયત્વાવચનાચ્ચ ॐ ॥ ૧.૧.૮ ॥

ॐ સ્વાપ્યયાત્ ॐ ॥ ૧.૧.૯ ॥

ॐ ગતિસામાન્યાત્ ॐ ॥ ૧.૧.૧૦ ॥

ॐ શ્રુતત્વાચ્ચ ॐ ॥ ૧.૧.૧૧ ॥

ॐ આનન્દમયોઽભ્યાસાત્ ॐ ॥ ૧.૧.૧૨ ॥

ॐ વિકારશબ્દાન્નેતિચેન્ન પ્રાચુર્યાત્ ॐ ॥ ૧.૧.૧૩ ॥

ॐ તદ્ધેતુવ્યપદેશાચ્ચ ॐ ॥ ૧.૧.૧૪ ॥

ॐ માન્ત્રવર્ણિકમેવ ચ ગીયતે ॐ ॥ ૧.૧.૧૫॥

ॐ નેતરોઽનુપપત્તેઃ ॐ ॥ ૧.૧.૧૬॥

ॐ ભેદવ્યપદેશાચ્ચ ॐ ॥ ૧.૧.૧૭॥

ॐ કામાચ્ચ નાનુમાનાપેક્ષા ॐ ॥ ૧.૧.૧૮॥

ॐ અસ્મિન્નસ્ય ચ તદ્યોગં શાસ્તિ ॐ ॥ ૧.૧.૧૯॥

ॐ અન્તસ્તદ્ધર્મોપદેશાત્ ॐ ॥ ૧.૧.૨૦॥

ॐ ભેદવ્યપદેશાચ્ચાન્યઃ ॐ ॥ ૧.૧.૨૧॥

ॐ આકાશસ્તલ્લિઙ્ગાત્ ॐ ॥ ૧.૧.૨૨॥

ॐ અત એવ પ્રાણઃ ॐ ॥ ૧.૧.૨૩॥

ॐ જ્યોતિશ્ચરણાભિધાનાત્ ॐ ॥ ૧.૧.૨૪॥

ॐ છન્દોઽભિધાનાન્નેતિચેન્ન તથાચેતોઽર્પણનિગદાત્તથા
હિ દર્શનમ્ ॐ ॥ ૧.૧.૨૫॥

ॐ ભૂતાદિપાદવ્યપદેશોપપત્તેશ્ચૈવમ્ ॐ ॥ ૧.૧.૨૬॥

ॐ ઉપદેશભેદાન્નેતિ ચેન્નોભયસ્મિન્નપ્યવિરોધાત્ ॐ ॥ ૧.૧.૨૭॥

ॐ પ્રાણસ્તથાનુગમાત્ ॐ ॥ ૧.૧.૨૮॥

ॐ નવક્તુરાત્મોપદેશાદિતિ ચેદધ્યાત્મસંબન્ધભૂમા
હ્યસ્મિન્ ॐ ॥ ૧.૧.૨૯॥

ॐ શાસ્ત્રદૃષ્ટ્યા તૂપદેશો વામદેવવત્ ॐ ॥ ૧.૧.૩૦॥

ॐ જીવમુખ્યપ્રાણલિઙ્ગાન્નેતિ ચેન્નોપાસત્રૈવિધ્યાદાશ્રિતત્વાદિહ
તદ્યોગાત્ ॐ ॥ ૧.૧.૩૧॥

ઇતિ શ્રીમત્કૃષ્ણદ્વૈપાયનકૃતબ્રહ્મસૂત્રેષુ

## પ્રથમાધ્યાયસ્ય પ્રથમઃ પાદઃ સમાપ્તઃ

ॐ સર્વત્ર પ્રસિદ્ધોપદેશાત્ ॐ ॥ ૧.૨.૧॥

ॐ વિવક્ષિતગુણોપપત્તેશ્ચ ॐ ॥ ૧.૨.૨॥

ॐ અનુપપત્તેસ્તુ ન શારીરઃ ॐ ॥ ૧.૨.૩॥

ॐ કર્મકર્તૃવ્યપદેશાચ્ચ ॐ ॥ ૧.૨.૪॥

ॐ શબ્દવિશેષાત્ ॐ ॥ ૧.૨.૫॥

ॐ સ્મૃતેશ્ચ ॐ ॥ ૧.૨.૬॥

ॐ અર્ભકૌકસ્ત્વાત્ તદ્વ્યપદેશાચ્ચ નેતિ ચેન્ન નિચાય્યત્વાદેવં
વ્યોમવચ્ચ ॐ ॥ ૧.૨.૭॥

ॐ સંભોગપ્રાપ્તિરિતિ ચેન્ન વૈશેષ્યાત્ ॐ ॥ ૧.૨.૮॥

ॐ અત્તા ચરાચરગ્રહણાત્ ॐ ॥ ૧.૨.૯॥

ॐ પ્રકરણાચ્ચ ॐ ॥ ૧.૨.૧૦॥

ॐ ગુહાં પ્રવિષ્ટાવાત્માનૌ હિ તદ્દર્શનાત્ ॐ ॥ ૧.૨.૧૧॥

ॐ વિશેષણાચ્ચ ॐ ॥ ૧.૨.૧૨॥

ॐ અન્તર ઉપપત્તેઃ ॐ ॥ ૧.૨.૧૩॥

ॐ સ્થાનાદિવ્યપદેશાચ્ચ ॐ ॥ ૧.૨.૧૪॥

ॐ સુખવિશિષ્ટાભિધાનાદેવ ચ ॐ ॥ ૧.૨.૧૫॥

ॐ શ્રુતોપનિષત્કગત્યભિધાનાચ્ચ ॐ ॥ ૧.૨.૧૬॥

ॐ અનવસ્થિતેરસંભવાચ્ચ નેતરઃ ॐ ॥ ૧.૨.૧૭॥

ॐ અન્તર્યામ્યધિદૈવાદિષુ તદ્ધર્મવ્યપદેશાત્ ॐ ॥ ૧.૨.૧૮॥

ॐ ન ચ સ્માર્તં અતદ્ધર્માભિપાલાત્ ॐ ॥ ૧.૨.૧૯॥

ॐ શરીરશ્ચોભયેઽપિ હિ ભેદેનૈનમધીયતે ॐ ॥ ૧.૨.૨૦॥

ॐ અદૃશ્યત્વાદિગુણકો ધર્મોક્તેઃ ॐ ॥ ૧.૨.૨૧॥

ॐ વિશેષણભેદવ્યપદેશાભ્યાં નેતરૌ ॐ ॥ ૧.૨.૨૨॥

ॐ રૂપોપન્યાસાચ્ચ ॐ ॥ ૧.૨.૨૩॥

ॐ વૈશ્વાનરઃ સાધારણશબ્દવિશેષાત્ ॐ ॥ ૧.૨.૨૪॥

ॐ સ્મર્યમાણમનુમાનં સ્યાદિતિ ॐ ॥ ૧.૨.૨૫॥

ॐ શબ્દાદિભ્યોઽન્તઃ પ્રતિષ્ઠાનાન્નેતિ ચેન્ન તથા

(પાઠભેદ પ્રતિષ્ઠાનાચ્ચ નેતિ ચેન્ન)
દૃષ્ટ્યુપદેશાદસંભવાત્પુરુષવિધમપિ ચૈનમધીયતે ૐ ॥ ૧.૨.૨૬॥

ૐ અત એવ ન દેવતા ભૂતં ચ ૐ ॥ ૧.૨.૨૭॥

ૐ સાક્ષાદપ્યવિરોધં જૈમિનિઃ ૐ ॥ ૧.૨.૨૮॥

ૐ અભિવ્યક્તેરિત્યાશ્મરથ્યઃ ૐ ॥ ૧.૨.૨૯॥

ૐ અનુસ્મૃતેર્બાદરિઃ ૐ ॥ ૧.૨.૩૦॥

ૐ સમ્પત્તેરિતિ જૈમિનિઃ તથા હિ દર્શયતિ ૐ ॥ ૧.૨.૩૧॥

ૐ આમનન્તિ ચૈનમસ્મિન્ ૐ ॥ ૧.૨.૩૨॥

ઇતિ શ્રીમત્કૃષ્ણદ્વૈપાયનકૃતબ્રહ્મસૂત્રેષુ

## પ્રથમાધ્યાયસ્ય દ્વિતીયઃ પાદઃ સમાપ્તઃ

ૐ દ્યુભ્વાદ્યાયતનં સ્વશબ્દાત્ ૐ ॥ ૧.૩.૧॥

ૐ મુક્તોપસૃપ્યવ્યપદેશાત્ ૐ ॥ ૧.૩.૨॥

ૐ નાનુમાનમતચ્છબ્દાત્ ૐ ॥ ૧.૩.૩॥

ૐ પ્રાણભૃચ્ચ ૐ ॥ ૧.૩.૪॥

ૐ ભેદવ્યપદેશાત્ ૐ ॥ ૧.૩.૫॥

ૐ પ્રકરણાત્ ૐ ॥ ૧.૩.૬॥

ૐ સ્થિત્યદનાભ્યાં ચ ૐ ॥ ૧.૩.૭॥

ૐ ભૂમા સમ્પ્રસાદાદધ્યુપદેશાત્ ૐ ॥ ૧.૩.૮॥

ૐ ધર્મોપપત્તેશ્ચ ૐ ॥ ૧.૩.૯॥

ૐ અક્ષરમમ્બરાન્તધૃતેઃ ૐ ॥ ૧.૩.૧૦॥

ૐ સા ચ પ્રશાસનાત્ ૐ ॥ ૧.૩.૧૧॥

ૐ અન્યભાવવ્યાવૃત્તેશ્ચ ૐ ॥ ૧.૩.૧૨॥

ૐ ઈક્ષતિકર્મવ્યપદેશાત્ સઃ ૐ ॥ ૧.૩.૧૩॥

ૐ દહર ઉત્તરેભ્યઃ ૐ ॥ ૧.૩.૧૪॥

ॐ ગતિશબ્દાભ્યાં તથા હિ દૃષ્ટં લિઙ્ગં ચ ॐ ॥ ૧.૩.૧૫॥

ॐ ધૃતેશ્ચ મહિમ્નોઽસ્યાસ્મિન્નુપલબ્ધેઃ ॐ ॥ ૧.૩.૧૬॥

ॐ પ્રસિદ્ધેશ્ચ ॐ ॥ ૧.૩.૧૭॥

ॐ ઇતરપરામર્શાત્ સ ઇતિ ચેન્નાસમ્ભવાત્ ॐ ॥ ૧.૩.૧૮॥

ॐ ઉત્તરાચ્ચેદાવિર્ભૂતસ્વરૂપસ્તુ ॐ ॥ ૧.૩.૧૯॥

ॐ અન્યાર્થશ્ચ પરામર્શઃ ॐ ॥ ૧.૩.૨૦॥

ॐ અલ્પશ્રુતેરિતિ ચેત્તદુક્તમ્ ॐ ॥ ૧.૩.૨૧॥

ॐ અનુકૃતેસ્તસ્ય ચ ॐ ॥ ૧.૩.૨૨॥

ॐ અપિ સ્મર્યતે ॐ ॥ ૧.૩.૨૩॥ પાઠભેદ અપિ ચ સ્મર્યતે
ॐ શબ્દાદેવ પ્રમિતઃ ॐ ॥ ૧.૩.૨૪॥

ॐ હૃદ્યપેક્ષયા તુ મનુષ્યાધિકારત્વાત્ ॐ ॥ ૧.૩.૨૫॥

ॐ તદુપર્યપિ બાદરાયણઃ સંભવાત્ ॐ ॥ ૧.૩.૨૬॥

ॐ વિરોધઃ કર્મણીતિ ચેન્નાનેકપ્રતિપત્તેર્દર્શનાત્ ॐ ॥ ૧.૩.૨૭॥

ॐ શબ્દ ઇતિચેન્નાતઃ પ્રભવાત્પ્રત્યક્ષાનુમાનાભ્યામ્ ॐ ॥ ૧.૩.૨૮॥

ॐ અત એવ ચ નિત્યત્વમ્ ॐ ॥ ૧.૩.૨૯॥

ॐ સમાનનામરૂપત્વાચ્ચાવૃત્તાવપ્યવિરોધો
દર્શનાત્સ્મૃતેશ્ચ ॐ ॥ ૧.૩.૩૦॥

ॐ મધ્વાદિષ્વસંભવાદનધિકારં જૈમિનિઃ ॐ ॥ ૧.૩.૩૧॥

ॐ જ્યોતિષિ ભાવાચ્ચ ॐ ॥ ૧.૩.૩૨॥

ॐ ભાવં તુ બાદરાયણોઽસ્તિ હિ ॐ ॥ ૧.૩.૩૩॥

ॐ શુગસ્ય તદનાદરશ્રવણાત્તદાદ્રવણાત્સૂચ્યતે હિ ॐ ॥ ૧.૩.૩૪॥

ॐ ક્ષત્રિયત્વાગતેશ્ચોત્તરત્ર ચૈત્રરથેન લિઙ્ગાત્ ॐ ॥ ૧.૩.૩૫॥

ॐ સંસ્કારપરામર્શાત્તદભાવાભિલાપાચ્ચ ॐ ॥ ૧.૩.૩૬॥

ॐ તદભાવનિર્ધારણે ચ પ્રવૃત્તેઃ ॐ ॥ ૧.૩.૩૭॥

ॐ શ્રવણાધ્યયનાર્થપ્રતિષેધાત્ સ્મૃતેશ્ચ ॐ ॥ ૧.૩.૩૮॥

ૐ કમ્પનાત્ ૐ ॥ ૧.૩.૩૯॥

ૐ જ્યોતિર્દર્શનાત્ ૐ ॥ ૧.૩.૪૦॥

ૐ આકાશોઽર્થાન્તરત્વાદિવ્યપદેશાત્ ૐ ॥ ૧.૩.૪૧॥

ૐ સુષુપ્ત્યુત્ક્રાન્ત્યોર્ભેદેન ૐ ॥ ૧.૩.૪૨॥

ૐ પત્યાદિશબ્દેભ્યઃ ૐ ॥ ૧.૩.૪૩॥

ઇતિ શ્રીમત્કૃષ્ણદ્વૈપાયનકૃતબ્રહ્મસૂત્રેષુ

## પ્રથમાધ્યાયસ્ય તૃતીયઃ પાદઃ સમાપ્તઃ

ૐ આનુમાનિકમપ્યેકેષામિતિ ચેન્ન શરીરરૂપકવિન્યસ્તગૃહીતેર્દર્શયતિ
ચ ૐ ॥ ૧.૪.૧॥

ૐ સૂક્ષ્મં તુ તદર્હત્વાત્ ૐ ॥ ૧.૪.૨॥

ૐ તદધીનત્વાદર્થવત્ ૐ ॥ ૧.૪.૩॥

ૐ જ્ઞેયત્વાવચનાચ્ચ ૐ ॥ ૧.૪.૪॥

ૐ વદતીતિ ચેન્ન પ્રાજ્ઞો હિ ૐ ॥ ૧.૪.૫॥

પાઠભેદ 1.4.5 and 6 combined

ૐ પ્રકરણાત્ ૐ ॥ ૧.૪.૬॥

ૐ ત્રયાણામેવ ચૈવમુપન્યાસઃ પ્રશ્નશ્ચ ૐ ॥ ૧.૪.૭॥

ૐ મહદ્વચ્ચ ૐ ॥ ૧.૪.૮॥

ૐ ચમસવદવિશેષાત્ ૐ ॥ ૧.૪.૯॥

ૐ જ્યોતિરુપક્રમા તુ તથા હ્યધીયત એકે ૐ ॥ ૧.૪.૧૦॥ (જ્યોતિરુપક્રમાત્તુ)

ૐ કલ્પનોપદેશાચ્ચ મધ્વાદિવદવિરોધઃ ૐ ॥ ૧.૪.૧૧॥

ૐ ન સઙ્ખ્યોપસઙ્ગ્રહાદપિ નાનાભાવાદતિરેકાચ્ચ ૐ ॥ ૧.૪.૧૨॥

ૐ પ્રાણાદયો વાક્યશેષાત્ ૐ ॥ ૧.૪.૧૩॥

ૐ જ્યોતિષૈકેષામસત્યન્ને ૐ ॥ ૧.૪.૧૪॥

ૐ કારણત્વેન ચાકાશાદિષુ યથાવ્યપદિષ્ટોક્તેઃ ૐ ॥ ૧.૪.૧૫॥

ૐ સમાકર્ષાત્ ૐ ॥ ૧.૪.૧૬॥

ૐ જગદ્વાચિત્વાત્ ૐ ॥ ૧.૪.૧૭॥

ૐ જીવમુખ્યપ્રાણલિઙ્ગાન્નેતિ ચેત્ તદ્વ્યાખ્યાતમ્ ૐ ॥ ૧.૪.૧૮॥ (જીવમુખ્યપ્રાણલિઙ્ગાદિતિ)

ૐ અન્યાર્થં તુ જૈમિનિઃ પ્રશ્નવ્યાખ્યાનાભ્યામપિ ચૈવમેકે ૐ ॥ ૧.૪.૧૯॥

ૐ વાક્યાન્વયાત્ ૐ ॥ ૧.૪.૨૦॥

ૐ પ્રતિજ્ઞાસિદ્ધેર્લિઙ્ગમાશ્મરથ્યઃ ૐ ॥ ૧.૪.૨૧॥

ૐ ઉત્ક્રમિષ્યત એવં ભાવાદિત્યૌડુલોમિઃ ૐ ॥ ૧.૪.૨૨॥

ૐ અવસ્થિતેરિતિ કાશકૃત્સ્નઃ ૐ ॥ ૧.૪.૨૩॥

ૐ પ્રકૃતિશ્ચ પ્રતિજ્ઞાદૃષ્ટાન્તાનુપરોધાત્ ૐ ॥ ૧.૪.૨૪॥

ૐ અભિધ્યોપદેશાચ્ચ ૐ ॥ ૧.૪.૨૫॥

ૐ સાક્ષાચ્ચોભયામ્નાનાત્ ૐ ॥ ૧.૪.૨૬॥

ૐ આત્મકૃતેઃ પરિણામાત્ ૐ ॥ ૧.૪.૨૭॥

ૐ યોનિશ્ચ હિ ગીયતે ૐ ॥ ૧.૪.૨૮॥

ૐ એતેન સર્વેવ્યાખ્યાતાવ્યાખ્યાતાઃ ૐ ॥ ૧.૪.૨૯॥

ઇતિ શ્રીમત્કૃષ્ણદ્વૈપાયનકૃતબ્રહ્મસૂત્રેષુ
પ્રથમાધ્યાયસ્ય ચતુર્થઃ પાદઃ સમાપ્તઃ
॥ ઇતિ પ્રથમોઽધ્યાયઃ॥

## ॥ અથ દ્વિતીયોઽધ્યાયઃ॥

ૐ સ્મૃત્યનવકાશદોષપ્રસઙ્ગ ઇતિ
ચેન્નાન્યસ્મૃત્યનવકાશદોષપ્રસઙ્ગાત્ ૐ ॥ ૨.૧.૧॥

ૐ ઇતરેષાં ચાનુપલબ્ધેઃ ૐ ॥ ૨.૧.૨॥

ૐ એતેન યોગઃ પ્રત્યુક્તઃ ૐ ॥ ૨.૧.૩॥

ૐ ન વિલક્ષણત્વાદસ્ય તથાત્વં ચ શબ્દાત્ ૐ ॥ ૨.૧.૪॥

ૐ દૃશ્યતે તુ ૐ ॥ ૨.૧.૫॥

ૐ અભિમાનિવ્યપદેશસ્તુ વિશેષાનુગતિભ્યામ્ ૐ ॥ ૨.૧.૬॥

ૐ દૃશ્યતે ચ ૐ ॥ ૨.૧.૭॥ પાઠભેદ દૃશ્યતે તુ
ૐ અસદિતિ ચેન્ન પ્રતિષેધમાત્રત્વાત્ ૐ ॥ ૨.૧.૮॥

ૐ અપીતૌ તદ્વત્પ્રસઙ્ગાદસમઞ્જસમ્ ૐ ॥ ૨.૧.૯॥

ૐ ન તુ દૃષ્ટાન્તભાવાત્ ૐ ॥ ૨.૧.૧૦॥

ૐ સ્વપક્ષદોષાચ્ચ ૐ ॥ ૨.૧.૧૧॥

ૐ તર્કાપ્રતિષ્ઠાનાદપિ અન્યથાનુમેયમિતિ
ચેદેવમપ્યનિર્મોક્ષપ્રસઙ્ગઃ ૐ ॥ ૨.૧.૧૨॥

ૐ એતેન શિષ્ટાપરિગ્રહાઽપિ વ્યાખ્યાતાઃ ૐ ॥ ૨.૧.૧૩॥

ૐ ભોક્ત્રાપત્તેરવિભાગશ્ચેત્સ્યાલ્લોકવત્ ૐ ॥ ૨.૧.૧૪॥

ૐ તદનન્યત્વમારમ્ભણશબ્દાદિભ્યઃ ૐ ॥ ૨.૧.૧૫॥

ૐ ભાવે ચોપલબ્ધેઃ ૐ ॥ ૨.૧.૧૬॥

ૐ સત્ત્વાચ્ચાવરસ્ય ૐ ॥ ૨.૧.૧૭॥

ૐ અસદ્વ્યપદેશાન્નેતિ ચેન્ન ધર્માન્તરેણ વાક્યશેષાત્ ૐ ॥ ૨.૧.૧૮॥

ૐ યુક્તેઃ શબ્દાન્તરાચ્ચ ૐ ॥ ૨.૧.૧૯॥

ૐ પટવચ્ચ ૐ ॥ ૨.૧.૨૦॥

ૐ યથા પ્રાણાદિઃ ૐ ॥ ૨.૧.૨૧॥

ૐ ઇતરવ્યપદેશાદ્ધિતાકરણાદિદોષપ્રસક્તિઃ ૐ ॥ ૨.૧.૨૨॥

ૐ અધિકં તુ ભેદનિર્દેશાત્ ૐ ॥ ૨.૧.૨૩॥

ૐ અશ્માદિવચ્ચ તદનુપપત્તિઃ ૐ ॥ ૨.૧.૨૪॥

ૐ ઉપસંહારદર્શનાન્નેતિ ચેન્ન ક્ષીરવદ્ધિ ૐ ॥ ૨.૧.૨૫॥

ૐ દેવાદિવદપિ લોકે ૐ ॥ ૨.૧.૨૬॥

ૐ કૃત્સ્નપ્રસક્તિર્નિરવયવત્વશબ્દકોપો વા ૐ ॥ ૨.૧.૨૭॥

ૐ શ્રુતેસ્તુ શબ્દમૂલત્વાત્ ૐ ॥ ૨.૧.૨૮॥

ૐ આત્મનિ ચૈવં વિચિત્રાશ્ચ હિ ૐ ॥ ૨.૧.૨૯॥

ॐ સ્વપક્ષદોષાચ્ચ ॐ ॥ ૨.૧.૩૦॥

ॐ સર્વોપેતા ચ તદ્દર્શનાત્ ॐ ॥ ૨.૧.૩૧॥

ॐ વિકરણત્વાન્નેતિચેત્તદુક્તમ્ ॐ ॥ ૨.૧.૩૨॥

ॐ ન પ્રયોજનત્ત્વાત્ ॐ ॥ ૨.૧.૩૩॥

ॐ લોકવત્તુ લીલાકૈવલ્યમ્ ॐ ॥ ૨.૧.૩૪॥

ॐ વૈષ્યમ્યનૈર્ઘૃણ્યે ન સાપેક્ષત્વાત્તથા હિ દર્શયતિ ॐ ॥ ૨.૧.૩૫॥

ॐ કર્માવિભાગાદિતિ ચેન્નાનાદિત્વાત્ ॐ ॥ ૨.૧.૩૬॥

ॐ ઉપપદ્યતે ચાપ્યુપલભ્યતે ચ ॐ ॥ ૨.૧.૩૭॥

ॐ સર્વધર્મોપપત્તેશ્ચ ॐ ॥ ૨.૧.૩૮॥

ઇતિ શ્રીમત્કૃષ્ણદ્વૈપાયનકૃતબ્રહ્મસૂત્રેષુ

## દ્વિતીયાધ્યાયસ્ય પ્રથમઃ પાદઃ સમાપ્તઃ

ॐ રચનાનુપપત્તેશ્ચ નાનુમાનમ્ ॐ ॥ ૨.૨.૧॥

ॐ પ્રવૃત્તેશ્ચ ॐ ॥ ૨.૨.૨॥

ॐ પયોઽમ્બુવચ્ચેત્તત્રાપિ ॐ ॥ ૨.૨.૩॥

ॐ વ્યતિરેકાનવસ્થિતેશ્ચાનપેક્ષત્વાત્ ॐ ॥ ૨.૨.૪॥

ॐ અન્યત્રાભાવાચ્ચ ન તૃણાદિવત્ ॐ ॥ ૨.૨.૫॥

ॐ અભ્યુપગમેઽપ્યર્થાભાવાત્ ॐ ॥ ૨.૨.૬॥

ॐ પુરુષાશ્મવદિતિચેત્તથાપિ ॐ ॥ ૨.૨.૭॥

ॐ અઙ્ગિત્વાનુપપત્તેઃ ॐ ॥ ૨.૨.૮॥

ॐ અન્યથાનુમિતૌ ચ જ્ઞશક્તિવિયોગાત્ ॐ ॥ ૨.૨.૯॥

ॐ વિપ્રતિષેધાચ્ચાસમઞ્જસમ્ ॐ ॥ ૨.૨.૧૦॥

ॐ મહદ્દીર્ઘવદ્વા હ્રસ્વપરિમણ્ડલાભ્યામ્ ॐ ॥ ૨.૨.૧૧॥

ॐ ઉભયથાપિ ન કર્માતસ્તદભાવઃ ॐ ॥ ૨.૨.૧૨॥

ॐ સમવાયાભ્યુપગમાચ્ચ સામ્યાદનવસ્થિતેઃ ॐ ॥ ૨.૨.૧૩॥

ૐ નિત્યમેવ ચ ભાવાત્ ૐ ॥ ૨.૨.૧૪॥

ૐ રૂપાદિમત્ત્વાચ્ચ વિપર્યયો દર્શનાત્ ૐ ॥ ૨.૨.૧૫॥

ૐ ઉભયથા ચ દોષાત્ ૐ ॥ ૨.૨.૧૬॥

ૐ અપરિગ્રહાચ્ચાત્યન્તમનપેક્ષા ૐ ॥ ૨.૨.૧૭॥

ૐ સમુદાયોભયહેતુકેઽપિ તદપ્રાપ્તિઃ ૐ ॥ ૨.૨.૧૮॥

ૐ ઇતરેતરપ્રત્યયત્વાદિતિ ચેન્નોત્પત્તિમાત્રનિમિત્તત્વાત્ ૐ ॥ ૨.૨.૧૯॥

ૐ ઉત્તરોત્પાદે ચ પૂર્વનિરોધાત્ ૐ ॥ ૨.૨.૨૦॥

ૐ અસતિ પ્રતિજ્ઞોપરોધો યૌગપદ્યમન્યથા ૐ ॥ ૨.૨.૨૧॥

ૐ પ્રતિસઙ્ખ્યાપ્રતિસઙ્ખ્યાનિરોધાપ્રાપ્તિઃ અવિચ્છેદાત્ ૐ ॥ ૨.૨.૨૨॥

ૐ ઉભયથા ચ દોષાત્ ૐ ॥ ૨.૨.૨૩॥

ૐ આકાશે ચાવિશેષાત્ ૐ ॥ ૨.૨.૨૪॥

ૐ અનુસ્મૃતેશ્ચ ૐ ॥ ૨.૨.૨૫॥

ૐ નાસતોઽદૃષ્ટત્વાત્ ૐ ॥ ૨.૨.૨૬॥

ૐ ઉદાસીનાનામપિ ચૈવં સિદ્ધિઃ ૐ ॥ ૨.૨.૨૭॥

ૐ નાભાવ ઉપલબ્ધેઃ ૐ ॥ ૨.૨.૨૮॥

ૐ વૈધર્મ્યાચ્ચ ન સ્વપ્નાદિવત્ ૐ ॥ ૨.૨.૨૯॥

ૐ ન ભાવોઽનુપલબ્ધેઃ ૐ ॥ ૨.૨.૩૦॥

ૐ ક્ષણિકત્વાચ્ચ ૐ ॥ ૨.૨.૩૧॥

ૐ સર્વથાનુપપત્તેશ્ચ ૐ ॥ ૨.૨.૩૨॥

ૐ નૈકસ્મિન્નસમ્ભવાત્ ૐ ॥ ૨.૨.૩૩॥

ૐ એવં ચાત્માકાર્ત્સ્ન્યમ્ ૐ ॥ ૨.૨.૩૪॥

ૐ ન ચ પર્યાયાદપ્યવિરોધઃ વિકારાદિભ્યઃ ૐ ॥ ૨.૨.૩૫॥

ૐ અન્ત્યાવસ્થિતેશ્ચોભયનિત્યત્વાદવિશેષત્ ૐ ॥ ૨.૨.૩૬॥

ૐ પત્યુરસામઞ્જસ્યાત્ ૐ ॥ ૨.૨.૩૭॥

ॐ સંબન્ધાનુપપત્તેશ્ચ ॐ ॥ ૨.૨.૩૮॥

ॐ અધિષ્ઠાનાનુપપત્તેશ્ચ ॐ ॥ ૨.૨.૩૯॥

ॐ કરણવચ્ચેન્ન ભોગાદિભ્યઃ ॐ ॥ ૨.૨.૪૦॥

ॐ અન્તવત્ત્વમસર્વજ્ઞતા વા ॐ ॥ ૨.૨.૪૧॥

ॐ ઉત્પત્ત્યસમ્ભવાત્ ॐ ॥ ૨.૨.૪૨॥

ॐ ન ચ કર્તુઃ કરણમ્ ॐ ॥ ૨.૨.૪૩॥

ॐ વિજ્ઞાનાદિભાવે વા તદપ્રતિષેધઃ ॐ ॥ ૨.૨.૪૪॥

ॐ વિપ્રતિષેધાચ્ચ ॐ ॥ ૨.૨.૪૫॥

ઇતિ શ્રીમત્કૃષ્ણદ્વૈપાયનકૃતબ્રહ્મસૂત્રેષુ

## દ્વિતીયાધ્યાયસ્ય દ્વિતીયઃ પાદઃ સમાપ્તઃ

ॐ ન વિયદશ્રુતેઃ ॐ ॥ ૨.૩.૧॥

ॐ અસ્તિ તુ ॐ ॥ ૨.૩.૨॥

ॐ ગૌણ્યસમ્ભવાત્ ॐ ॥ ૨.૩.૩॥

ॐ શબ્દાચ્ચ ॐ ॥ ૨.૩.૪॥

ॐ સ્યાચ્ચૈકસ્ય બ્રહ્મશબ્દવત્ ॐ ॥ ૨.૩.૫॥

ॐ પ્રતિજ્ઞાહાનિરવ્યતિરેકાચ્છબ્દેભ્યઃ ॐ ॥ ૨.૩.૬॥

ॐ યાવદ્વિકારં તુ વિભાગો લોકવત્ ॐ ॥ ૨.૩.૭॥

ॐ એતેન માતરિશ્વા વ્યાખ્યાતઃ ॐ ॥ ૨.૩.૮॥

ॐ અસમ્ભવસ્તુ સતોઽનુપપત્તેઃ ॐ ॥ ૨.૩.૯॥

ॐ તેજોઽતસ્તથા હ્યાહ ॐ ॥ ૨.૩.૧૦॥

ॐ આપઃ ॐ ॥ ૨.૩.૧૧॥

ॐ પૃથિવ્યધિકારરૂપશબ્દાન્તરાદિભ્યઃ ॐ ॥ ૨.૩.૧૨॥

ॐ તદભિધ્યાનાદેવ તુ તલ્લિઙ્ગાત્ સઃ ॐ ॥ ૨.૩.૧૩॥

ૐ વિપર્યયેણ તુ ક્રમોઽત ઉપપદ્યતે ચ ૐ ॥ ૨.૩.૧૪॥

ૐ અન્તરા વિજ્ઞાનમનસી ક્રમેણ તલ્લિઙ્ગાદિતિ
ચેન્નાવિશેષાત્ ૐ ॥ ૨.૩.૧૫॥

ૐ ચરાચરવ્યપાશ્રયસ્તુ સ્યાત્ તદ્વ્યપદેશો ભાક્તઃ
તદ્ભાવભાવિત્વાત્ ૐ ॥ ૨.૩.૧૬॥

ૐ નાત્મા અશ્રુતેર્નિત્યત્વાચ્ચ તાભ્યઃ ૐ ॥ ૨.૩.૧૭॥

ૐ જ્ઞોઽત એવ ૐ ॥ ૨.૩.૧૮॥

ૐ યુક્તેશ્ચ ૐ ॥ ૨.૩.૧૯॥

ૐ ઉત્ક્રાન્તિગત્યાગતીનામ્ ૐ ॥ ૨.૩.૨૦॥

ૐ સ્વાત્મના ચોત્તરયોઃ ૐ ॥ ૨.૩.૨૧॥

ૐ નાણુરતત્ શ્રુતેરિતિ ચેન્ન ઇતરાધિકારાત્ ૐ ॥ ૨.૩.૨૨॥

ૐ સ્વશબ્દોન્માનાભ્યાં ચ ૐ ॥ ૨.૩.૨૩॥

ૐ અવિરોધશ્ચન્દનવત્ ૐ ॥ ૨.૩.૨૪॥

ૐ અવસ્થિતિવૈશેષ્યાદિતિ ચેન્નાભ્યુપગમાદ્ધૃદિ હિ ૐ ॥ ૨.૩.૨૫॥

ૐ ગુણાદ્વાઽઽલોકવત્ ૐ ॥ ૨.૩.૨૬॥

ૐ વ્યતિરેકો ગન્ધવત્ તથા ચ દર્શયતિ ૐ ॥ ૨.૩.૨૭॥

ૐ પૃથગુપદેશાત્ ૐ ॥ ૨.૩.૨૮॥

ૐ તદ્ગુણસારત્વાત્તુ તદ્વ્યપદેશઃ પ્રાજ્ઞવત્ ૐ ॥ ૨.૩.૨૯॥

ૐ યાવદાત્મભાવિત્વાચ્ચ ન દોષસ્તદ્દર્શનાત્ ૐ ॥ ૨.૩.૩૦॥

ૐ પુંસ્ત્વાદિવત્ત્વસ્ય સતોઽભિવ્યક્તિયોગાત્ ૐ ॥ ૨.૩.૩૧॥

ૐ નિત્યોપલબ્ધ્યનુપલબ્ધિપ્રસઙ્ગોઽન્યતરનિયમો
વાઽન્યથા ૐ ॥ ૨.૩.૩૨॥

ૐ કર્તા શાસ્ત્રાર્થવત્ત્વાત્ ૐ ॥ ૨.૩.૩૩॥

ૐ વિહારોપદેશાત્ ૐ ॥ ૨.૩.૩૪॥

ૐ ઉપાદાનાત્ ૐ ॥ ૨.૩.૩૫॥

ૐ વ્યપદેશાચ્ચ ક્રિયાયાં ન ચેન્નિર્દેશવિપર્યયઃ ૐ ॥ ૨.૩.૩૬॥

ૐ ઉપલબ્ધિવદનિયમઃ ૐ ॥ ૨.૩.૩૭॥

ૐ શક્તિવિપર્યયાત્ ૐ ॥ ૨.૩.૩૮॥

ૐ સમાધ્યભાવાછ ૐ ॥ ૨.૩.૩૯॥

ૐ યથા ચ તક્ષોભયથા ૐ ॥ ૨.૩.૪૦॥

ૐ પરાત્તુ તચ્છ્રુતેઃ ૐ ॥ ૨.૩.૪૧॥

ૐ કૃતપ્રયત્નોપેક્ષસ્તુ વિહિતપ્રતિષિદ્ધાવૈયર્થ્યાદિભ્યઃ ૐ ॥ ૨.૩.૪૨॥

ૐ અંશો નાનાવ્યપદેશાદન્યથા ચાપિ
દાશકિતવાદિત્વમધીયત એકે ૐ ॥ ૨.૩.૪૩॥

ૐ મન્ત્રવર્ણાત્ ૐ ॥ ૨.૩.૪૪॥

ૐ અપિ સ્મર્યતે ૐ ॥ ૨.૩.૪૫॥ પાઠભેદ અપિ ચ સ્મર્યતે
ૐ પ્રકાશાદિવન્નૈવં પરઃ ૐ ॥ ૨.૩.૪૬॥

ૐ સ્મરન્તિ ચ ૐ ॥ ૨.૩.૪૭॥

ૐ અનુજ્ઞાપરિહારૌ દેહસમ્બન્ધાજ્જ્યોતિરાદિવત્ ૐ ॥ ૨.૩.૪૮॥

ૐ અસન્તતેશ્ચાવ્યતિકરઃ ૐ ॥ ૨.૩.૪૯॥

ૐ આભાસ એવ ચ ૐ ॥ ૨.૩.૫૦॥

ૐ અદૃષ્ટાનિયમાત્ ૐ ॥ ૨.૩.૫૧॥

ૐ અભિસન્ધ્યાદિષ્વપિ ચૈવમ્ ૐ ॥ ૨.૩.૫૨॥

ૐ પ્રદેશાદિતિ ચેન્નાન્તર્ભાવાત્ ૐ ॥ ૨.૩.૫૩॥

ઇતિ શ્રીમત્કૃષ્ણદ્વૈપાયનકૃતબ્રહ્મસૂત્રેષુ

## દ્વિતીયાધ્યાયસ્ય તૃતીયઃ પાદઃ સમાપ્તઃ

ૐ તથા પ્રાણાઃ ૐ ॥ ૨.૪.૧॥

ૐ ગૌણ્યસમ્ભવાત્ ૐ ॥ ૨.૪.૨॥

ૐ પ્રતિજ્ઞાનુપરોધાચ્ચ ૐ ॥ ૨.૪.૩॥ પાઠભેદ sUtra absent

ૐ તત્પ્રાક્શ્રુતેશ્ચ ૐ ॥ ૨.૪.૪॥

ૐ તત્પૂર્વકત્વાદ્વાચઃ ૐ ॥ ૨.૪.૫॥

ૐ સપ્ત ગતેર્વિશેષિતત્વાચ્ચ ૐ ॥ ૨.૪.૬॥

ૐ હસ્તાદયસ્તુ સ્થિતેઽતો નૈવમ્ ૐ ॥ ૨.૪.૭॥

ૐ અણવશ્ચ ૐ ॥ ૨.૪.૮॥

ૐ શ્રેષ્ઠશ્ચ ૐ ॥ ૨.૪.૯॥

ૐ ન વાયુક્રિયે પૃથગુપદેશાત્ ૐ ॥ ૨.૪.૧૦॥

ૐ ચક્ષુરાદિવત્તુ તત્સહશિષ્ટ્યાદિભ્યઃ ૐ ॥ ૨.૪.૧૧॥

ૐ અકરણત્વાચ્ચ ન દોષસ્તથા હિ દર્શયતિ ૐ ॥ ૨.૪.૧૨॥

ૐ પઞ્ચવૃત્તિર્મનોવદ્વ્યપદિશ્યતે ૐ ॥ ૨.૪.૧૩॥

ૐ અણુશ્ચ ૐ ॥ ૨.૪.૧૪॥

ૐ જ્યોતિરાદ્યધિષ્ઠાનં તુ તદામનનાત્ ૐ ॥ ૨.૪.૧૫॥

ૐ પ્રાણવતા શબ્દાત્ ૐ ॥ ૨.૪.૧૬॥

ૐ તસ્ય ચ નિતયત્વાત્ ૐ ॥ ૨.૪.૧૭॥

ૐ ત ઇન્દ્રિયાણિ તદ્વ્યપદેશાદન્યત્ર શ્રેષ્ઠાત્ ૐ ॥ ૨.૪.૧૮॥

ૐ ભેદશ્રુતેઃ ૐ ॥ ૨.૪.૧૯॥

ૐ વૈલક્ષણ્યાચ્ચ ૐ ॥ ૨.૪.૨૦॥

ૐ સંજ્ઞામૂર્તિક્લૃપ્તિસ્તુ ત્રિવૃત્કુર્વત ઉપદેશાત્ ૐ ॥ ૨.૪.૨૧॥

ૐ માંસાદિ ભૌમં યથાશબ્દમિતરયોશ્ચ ૐ ॥ ૨.૪.૨૨॥

ૐ વૈશેષ્યાત્તુ તદ્વાદસ્તદ્વાદઃ ૐ ॥ ૨.૪.૨૩॥

ઇતિ શ્રીમત્કૃષ્ણદ્વૈપાયનકૃતબ્રહ્મસૂત્રેષુ
દ્વિતીયાધ્યાયસ્ય ચતુર્થઃ પાદઃ સમાપ્તઃ
॥ ઇતિ દ્વિતીયોઽધ્યાયઃ॥

## ॥ અથ તૃતીયોઽધ્યાયઃ ॥

ॐ તદન્તરપ્રતિપત્તૌ રંહતિ સમ્પરિષ્વક્તઃ
પ્રશ્નનિરૂપણાભ્યામ્ ॐ ॥ ૩.૧.૧॥

ॐ ત્ર્યાત્મકત્વાત્તુ ભૂયસ્ત્વાત્ ॐ ॥ ૩.૧.૨॥

ॐ પ્રાણગતેશ્ચ ॐ ॥ ૩.૧.૩॥

ॐ અગ્ન્યાદિગતિશ્રુતેરિતિ ચેન્ન ભાક્તત્વાત્ ॐ ॥ ૩.૧.૪॥

ॐ પ્રથમેઽશ્રવણાદિતિ ચેન્ન તા એવ હ્યુપપત્તેઃ ॐ ॥ ૩.૧.૫॥

ॐ અશ્રુતત્વાદિતિ ચેન્નેષ્ટાદિકારિણાં પ્રતીતેઃ ॐ ॥ ૩.૧.૬॥

ॐ ભાક્તં વાઽનાત્મવિત્ત્વાત્ તથા હિ દર્શયતિ ॐ ॥ ૩.૧.૭॥

ॐ કૃતાત્યયેઽનુશયવાન્ દૃષ્ટસ્મૃતિભ્યામ્ ॐ ॥ ૩.૧.૮॥

પાઠભેદ 3.1.8 and 9 combined

ॐ યથેતમનેવં ચ ॐ ॥ ૩.૧.૯॥

ॐ ચરણાદિતિ ચેન્નોપલક્ષણાર્થેતિ કાર્ષ્ણાજિનિઃ ॐ ॥ ૩.૧.૧૦॥

ॐ આનર્થક્યમિતિ ચેન્ન તદપેક્ષત્વાત્ ॐ ॥ ૩.૧.૧૧॥

ॐ સુકૃતદુષ્કૃતે એવેતિ તુ બાદરિઃ ॐ ॥ ૩.૧.૧૨॥

ॐ અનિષ્ટાદિકારિણામપિ ચ શ્રુતમ્ ॐ ॥ ૩.૧.૧૩॥

ॐ સંયમને ત્વનુભૂયેતરેષામારોહાવરોહૌ
તદ્ગતિદર્શનાત્ ॐ ॥ ૩.૧.૧૪॥

ॐ સ્મરન્તિ ચ ॐ ॥ ૩.૧.૧૫॥

ॐ અપિ સપ્ત ॐ ॥ ૩.૧.૧૬॥

ॐ તત્રાપિ ચ તદ્વ્યાપારાદવિરોધઃ ॐ ॥ ૩.૧.૧૭॥

ॐ વિદ્યાકર્મણોરિતિ તુ પ્રકૃતત્વાત્ ॐ ॥ ૩.૧.૧૮॥

ॐ ન તૃતીયે તથોપલબ્ધેઃ ॐ ॥ ૩.૧.૧૯॥

ॐ સ્મર્યતેઽપિ ચ લોકે ॐ ॥ ૩.૧.૨૦॥

ॐ દર્શનાચ્ચ ॐ ॥ ૩.૧.૨૧॥

ॐ તૃતીયે શબ્દાવરોધઃ સંશોકજસ્ય ॐ ॥ ૩.૧.૨૨॥

ॐ સ્મરણાચ્ચ ॐ ॥ ૩.૧.૨૩॥

ॐ તત્સ્વાભાવ્યાપત્તિરુપપત્તેઃ ॐ ॥ ૩.૧.૨૪॥

ॐ નાતિચિરેણ વિશેષાત્ ॐ ॥ ૩.૧.૨૫॥

ॐ અન્યાધિષ્ઠિતે પૂર્વવદભિલાપાત્ ॐ ॥ ૩.૧.૨૬॥

ॐ અશુદ્ધમિતિ ચેન્ન શબ્દાત્ ॐ ॥ ૩.૧.૨૭॥

ॐ રેતઃ સિગ્યોગોઽથ ॐ ॥ ૩.૧.૨૮॥

ॐ યોનેઃ શરીરમ્ ॐ ॥ ૩.૧.૨૯॥

ઇતિ શ્રીમત્કૃષ્ણદ્વૈપાયનકૃતબ્રહ્મસૂત્રેષુ

## તૃતીયાધ્યાયસ્ય પ્રથમઃ પાદઃ સમાપ્તઃ

ॐ સન્ધ્યે સૃષ્ટિરાહ હિ ॐ ॥ ૩.૨.૧॥

ॐ નિર્માતારં ચૈકે પુત્રાદયશ્ચ ॐ ॥ ૩.૨.૨॥

ॐ માયામાત્રં તુ કાર્ત્સ્ન્યેનાનભિવ્યક્તસ્વરૂપત્વાત્ ॐ ॥ ૩.૨.૩॥

ॐ સૂચકશ્ચ હિ શ્રુતેઃ આચક્ષતે ચ તદ્વિદઃ ॐ ॥ ૩.૨.૪॥

ॐ પરાભિધ્યાનાત્તુ તિરોહિતં તતો હ્યસ્ય બન્ધવિપર્યયૌ ॐ ॥ ૩.૨.૫॥

ॐ દેહયોગાદ્વાસોઽપિ ॐ ॥ ૩.૨.૬॥

ॐ તદભાવો નાડીષુ તચ્છ્રુતેઃ આત્મનિ ચ ॐ ॥ ૩.૨.૭॥

ॐ અતઃ પ્રબોધોઽસ્માત્ ॐ ॥ ૩.૨.૮॥

ॐ સ એવ તુ કર્માનુસ્મૃતિશબ્દવિધિભ્યઃ ॐ ॥ ૩.૨.૯॥

ॐ મુગ્ધેઽર્થસમ્પત્તિર્પરિશેષાત્ ॐ ॥ ૩.૨.૧૦॥

ॐ ન સ્થાનતોઽપિ પરસ્યોભયલિઙ્ગં સર્વત્ર હિ ॐ ॥ ૩.૨.૧૧॥

ॐ ન ભેદાદિતિ ચેન્ન પ્રત્યેકમતદ્વચનાત્ ॐ ॥ ૩.૨.૧૨॥

ॐ અપિ ચૈવમેકે ॐ ॥ ૩.૨.૧૩॥

ॐ અરૂપવદેવ હિ તત્પ્રધાનત્વાત્ ॐ ॥ ૩.૨.૧૪॥

ॐ પ્રકાશવચ્ચાવૈયર્થ્યમ્ ॐ ॥ ૩.૨.૧૫॥

ॐ આહ ચ તન્માત્રમ્ ॐ ॥ ૩.૨.૧૬॥

ॐ દર્શયતિ ચાથોऽપિ સ્મર્યતે ॐ ॥ ૩.૨.૧૭॥

ॐ અત એવ ચોપમા સૂર્યકાદિવત્ ॐ ॥ ૩.૨.૧૮॥

ॐ અમ્બુવદગ્રહણાત્તુ ન તથાત્વમ્ ॐ ॥ ૩.૨.૧૯॥

ॐ વૃદ્ધિહ્રાસભાક્ત્વમન્તર્ભાવાત્
ઉભયસામઞ્જસ્યાદેવમ્ ॐ ॥ ૩.૨.૨૦॥

ॐ દર્શનાચ્ચ ॐ ॥ ૩.૨.૨૧॥

ॐ પ્રકૃતૈતાવત્ત્વં હિ પ્રતિષેધતિ તતો બ્રવીતિ
ચ ભૂયઃ ॐ ॥ ૩.૨.૨૨॥

ॐ તદવ્યક્તમાહ હિ ॐ ॥ ૩.૨.૨૩॥

ॐ અપિ સંરાધને પ્રત્યક્ષાનુમાનાભ્યામ્ ॐ ॥ ૩.૨.૨૪॥

ॐ પ્રકાશવચ્ચાવૈશેષ્યં ॐ ॥ ૩.૨.૨૫॥

પાઠભેદ 3.2.25 and 26 combined

ॐ પ્રકાશશ્ચ કર્મણ્યભ્યાસાત્ ॐ ॥ ૩.૨.૨૬॥

ॐ અતોऽનન્તેન તથા હિ લિઙ્ગમ્ ॐ ॥ ૩.૨.૨૭॥

ॐ ઉભયવ્યપદેશાત્તુ અહિકુણ્ડલવત્ ॐ ॥ ૩.૨.૨૮॥

ॐ પ્રકાશાશ્રયવદ્વા તેજસ્ત્વાત્ ॐ ॥ ૩.૨.૨૯॥

ॐ પૂર્વવદ્વા ॐ ॥ ૩.૨.૩૦॥

ॐ પ્રતિષેધાચ્ચ ॐ ॥ ૩.૨.૩૧॥

ॐ પરમતસ્સેતૂન્માનસંબન્ધભેદવ્યપદેશેભ્યઃ ॐ ॥ ૩.૨.૩૨॥

ॐ દર્શનાત્ ॐ ॥ ૩.૨.૩૩॥

ॐ બુદ્ધ્યર્થઃ પાદવત્ ॐ ॥ ૩.૨.૩૪॥

ॐ સ્થાનવિશેષાત્પ્રકાશાદિવત્ ॐ ॥ ૩.૨.૩૫॥

ૐ ઉપપત્તેશ્ચ ૐ ॥ ૩.૨.૩૬॥

ૐ તથાઽન્યપ્રતિષેધાત્ ૐ ॥ ૩.૨.૩૭॥

ૐ અનેન સર્વગતત્વમાયામયશબ્દાદિભ્યઃ ૐ ॥ ૩.૨.૩૮॥

ૐ ફલમત ઉપપત્તેઃ ૐ ॥ ૩.૨.૩૯॥

ૐ શ્રુતત્વાચ્ચ ૐ ॥ ૩.૨.૪૦॥

ૐ ધર્મં જૈમિનિઃ અત એવ ૐ ॥ ૩.૨.૪૧॥

ૐ પૂર્વં તુ બાદરાયણો હેતુવ્યપદેશાત્ ૐ ॥ ૩.૨.૪૨॥

ઇતિ શ્રીમત્કૃષ્ણદ્વૈપાયનકૃતબ્રહ્મસૂત્રેષુ

## તૃતીયાધ્યાયસ્ય દ્વિતીયઃ પાદઃ સમાપ્તઃ

ૐ સર્વવેદાન્તપ્રત્યયં ચોદનાદ્યવિશેષાત્ ૐ ॥ ૩.૩.૧॥

ૐ ભેદાન્નેતિ ચેદેકસ્યામપિ ૐ ॥ ૩.૩.૨॥

ૐ સ્વાધ્યાયસ્ય તથાત્વેન હિ સમાચારેઽધિકારાચ્ચ ૐ ॥ ૩.૩.૩॥

પાઠભેદ + સમાચારેઽધિકારાચ્ચ સવવચ્ચ તન્નિયમઃ

ૐ સલિલવચ્ચ  તન્નિયમઃ ૐ ॥ ૩.૩.૪॥

ૐ દર્શયતિ ચ ૐ ॥ ૩.૩.૫॥

ૐ ઉપસંહારોઽર્થાભેદાદ્વિધિશેષવત્સમાને ચ ૐ ॥ ૩.૩.૬॥

ૐ અન્યથાત્વં ચ શબ્દાદિતિ ચેન્નાવિશેષાત્ ૐ ॥ ૩.૩.૭॥

ૐ ન વા પ્રકરણભેદાત્પરોવરીયસ્ત્વાદિવત્ ૐ ॥ ૩.૩.૮॥

ૐ સંજ્ઞાતશ્ચેત્તદુક્તમસ્તિ તુ તદપિ ૐ ॥ ૩.૩.૯॥

ૐ પ્રાપ્તેશ્ચ સમઞ્જસમ્ ૐ ॥ ૩.૩.૧૦॥

ૐ સર્વાભેદાદન્યત્રેમે ૐ ॥ ૩.૩.૧૧॥

ૐ આનન્દાદયઃ પ્રધાનસ્ય ૐ ॥ ૩.૩.૧૨॥

ૐ પ્રિયશિરસ્ત્વાદ્યપ્રાપ્તિરુપચયાપચયૌ હિ ભેદે ૐ ॥ ૩.૩.૧૩॥

ૐ ઇતરે ત્વર્થસામાન્યાત્ ૐ ॥ ૩.૩.૧૪॥

ૐ આધ્યાનાય પ્રયોજનાભાવાત્ ૐ ॥ ૩.૩.૧૫॥

ૐ આત્મશબ્દાચ્ચ ૐ ॥ ૩.૩.૧૬॥

ૐ આત્મગૃહીતિરિતરવદુત્તરાત્ ૐ ॥ ૩.૩.૧૭॥

ૐ અન્વયાદિતિ ચેત્સ્યાદવધારણાત્ ૐ ॥ ૩.૩.૧૮॥

ૐ કાર્યાખ્યાનાદપૂર્વમ્ ૐ ॥ ૩.૩.૧૯॥

ૐ સમાન એવઞ્ચાભેદાત્ ૐ ॥ ૩.૩.૨૦॥

ૐ સંબન્ધાદેવમન્યત્રાપિ ૐ ॥ ૩.૩.૨૧॥

ૐ ન વા વિશેષાત્ ૐ ॥ ૩.૩.૨૨॥

ૐ દર્શયતિ ચ ૐ ॥ ૩.૩.૨૩॥

ૐ સમ્ભૃતિદ્યુવ્યાપ્ત્યપિ ચાતઃ ૐ ॥ ૩.૩.૨૪॥

ૐ પુરુષવિદ્યાયામિવ ચેતરેષામનામ્નાનાત્ ૐ ॥ ૩.૩.૨૫॥

ૐ વેધાદ્યર્થભેદાત્ ૐ ॥ ૩.૩.૨૬॥

ૐ હાનૌ તૂપાયનશબ્દશેષાત્ કુશાચ્છન્દસ્સ્તુત્યુપગાનવત્
તદુક્તમ્ ૐ ॥ ૩.૩.૨૭॥

ૐ સામ્પરાયે તર્તવ્યાભાવાત્ તથા હ્યન્યે ૐ ॥ ૩.૩.૨૮॥

ૐ છન્દત ઉભયાવિરોધાત્ ૐ ॥ ૩.૩.૨૯॥

ૐ ગતેરર્થવત્ત્વમુભયથાઽન્યથા હિ વિરોધઃ ૐ ॥ ૩.૩.૩૦॥

ૐ ઉપપન્નસ્તલ્લક્ષણાર્થોપલબ્ધેઃ લોકવત્ ૐ ॥ ૩.૩.૩૧॥

ૐ અનિયમઃ સર્વેષામવિરોધશ્શબ્દાનુમાનાભ્યામ્ ૐ ॥ ૩.૩.૩૨॥

ૐ યાવદધિકારમવસ્થિતિરાધિકારિકાણામ્ ૐ ॥ ૩.૩.૩૩॥

ૐ અક્ષરધિયાં ત્વવિરોધઃ
સામાન્યતદ્ભાવાભ્યામૌપસદવત્તદુક્તમ્ ૐ ॥ ૩.૩.૩૪॥

ૐ ઇયદામનનાત્ ૐ ॥ ૩.૩.૩૫॥

ૐ અન્તરા ભૂતગ્રામવદિતિ ચેત્ તદુક્તમ્ ૐ ॥ ૩.૩.૩૬॥

ૐ અન્યથા ભેદાનુપપત્તિરિતિચેન્નોપદેશવત્ ૐ ॥ ૩.૩.૩૭॥

ॐ વ્યતિહારો વિશિંષન્તિ હીતરવ્રત્ ॐ ॥ ૩.૩.૩૮॥

ॐ સૈવ હિ સત્યાદયઃ ॐ ॥ ૩.૩.૩૯॥

ॐ કામાદિતરત્ર તત્ર ચ આયતનાદિભ્યઃ ॐ ॥ ૩.૩.૪૦॥

ॐ આદારાદલોપઃ ॐ ॥ ૩.૩.૪૧॥

ॐ ઉપસ્થિતેસ્તદ્વચનાત્ ॐ ॥ ૩.૩.૪૨॥

ॐ તન્નિર્ધારણાર્થનિયમસ્તદ્દૃષ્ટેઃપૃથગ્ઘ્યપ્રતિબન્ધઃ
ફલમ્ ॐ ॥ ૩.૩.૪૩॥

ॐ પ્રદાનવદેવ હિ તદુક્તમ્ ॐ ॥ ૩.૩.૪૪॥

ॐ લિઙ્ગભૂયસ્ત્વાત્તદ્ધિ બલીયસ્તદપિ ॐ ॥ ૩.૩.૪૫॥

ॐ પૂર્વવિકલ્પઃ પ્રકરણાત્સ્યાત્ક્રિયામાનસવત્ ॐ ॥ ૩.૩.૪૬॥

ॐ અતિદેશાચ્ચ ॐ ॥ ૩.૩.૪૭॥

ॐ વિદ્યૈવ તુ નિર્ધારણાત્ ॐ ॥ ૩.૩.૪૮॥

ॐ દર્શનાચ્ચ ॐ ॥ ૩.૩.૪૯॥

ॐ શ્રુત્યાદિબલીયસ્ત્વાચ્ચ ન બાધઃ ॐ ॥ ૩.૩.૫૦॥

ॐ અનુબન્ધાદિભ્યઃ ॐ ॥ ૩.૩.૫૧॥

ॐ પ્રજ્ઞાન્તરપૃથક્ત્વવદ્દૃષ્ટિશ્ચ તદુક્તમ્ ॐ ॥ ૩.૩.૫૨॥

ॐ ન સામાન્યાદપ્યુપલબ્ધેર્મૃત્યુવન્નહિ લોકાપત્તિઃ ॐ ॥ ૩.૩.૫૩॥

ॐ પરેણ ચ શબ્દસ્ય તાદ્વિધ્યં ભૂયસ્ત્વાત્ત્વનુબન્ધઃ ॐ ॥ ૩.૩.૫૪॥

ॐ એક આત્મનઃ શરીરે ભાવાત્ ॐ ॥ ૩.૩.૫૫॥

ॐ વ્યતિરેકસ્તદ્ભાવભાવિત્વાન્ન તૂપલબ્ધિવત્ ॐ ॥ ૩.૩.૫૬॥

ॐ અઙ્ગાવબદ્ધાસ્તુ ન શાખાસુ હિ પ્રતિવેદમ્ ॐ ॥ ૩.૩.૫૭॥

ॐ મન્ત્રાદિવદ્વાઽવિરોધઃ ॐ ॥ ૩.૩.૫૮॥

ॐ ભૂમ્નઃ ક્રતુવજ્જ્યાયસ્ત્વં તથા ચ દર્શયતિ ॐ ॥ ૩.૩.૫૯॥

ॐ નાનાશબ્દાદિભેદાત્ ॐ ॥ ૩.૩.૬૦॥

ॐ વિકલ્પો વિશિષ્ટફલત્વાત્ ॐ ॥ ૩.૩.૬૧॥

ૐ કામ્યાસ્તુ યથાકામં સમુચ્ચીયેરન્ન વા પૂર્વહેત્વભાવાત્ ૐ ॥ ૩.૩.૬૨॥

ૐ અઙ્ગેષુ યથાશ્રયભાવઃ ૐ ॥ ૩.૩.૬૩॥

ૐ શિષ્ટેશ્ચ ૐ ॥ ૩.૩.૬૪॥

ૐ સમાહારાત્ ૐ ॥ ૩.૩.૬૫॥

ૐ ગુણસાધારણ્યશ્રુતેશ્ચ ૐ ॥ ૩.૩.૬૬॥

ૐ ન વા તત્સહભાવશ્રુતેઃ ૐ ॥ ૩.૩.૬૭॥

ૐ દર્શનાચ્ચ ૐ ॥ ૩.૩.૬૮॥

ઇતિ શ્રીમત્કૃષ્ણદ્વૈપાયનકૃતબ્રહ્મસૂત્રેષુ

## તૃતીયાધ્યાયસ્ય તૃતીયઃ પાદઃ સમાપ્તઃ

ૐ પુરુષાર્થોઽતઃ શબ્દાદિતિ બાદરાયણઃ ૐ ॥ ૩.૪.૧॥

ૐ શેષત્વાત્પુરુષાર્થવાદો યથાઽન્યેષ્વિતિ જૈમિનિઃ ૐ ॥ ૩.૪.૨॥

ૐ આચારદર્શનાત્ ૐ ॥ ૩.૪.૩॥

ૐ તચ્છ્રુતેઃ ૐ ॥ ૩.૪.૪॥

ૐ સમન્વારમ્ભણાત્ ૐ ॥ ૩.૪.૫॥

ૐ તદ્વતો વિધાનાત્ ૐ ॥ ૩.૪.૬॥

ૐ નિયમાચ્ચ ૐ ॥ ૩.૪.૭॥

ૐ અધિકોપદેશાત્તુ બાદરાયણસ્યૈવં તદ્દર્શનાત્ ૐ ॥ ૩.૪.૮॥

ૐ તુલ્યં તુ દર્શનમ્ ૐ ॥ ૩.૪.૯॥

ૐ અસાર્વત્રિકી ૐ ॥ ૩.૪.૧૦॥

ૐ વિભાગઃ શતવત્ ૐ ॥ ૩.૪.૧૧॥

ૐ અધ્યયનમાત્રવતઃ ૐ ॥ ૩.૪.૧૨॥

ૐ નાવિશેષાત્ ૐ ॥ ૩.૪.૧૩॥

ૐ સ્તુતયેઽનુમતિર્વા ૐ ॥ ૩.૪.૧૪॥

ॐ કામકારેણ ચૈકે ॐ ॥ ૩.૪.૧૫॥

ॐ ઉપમર્દં ચ ॐ ॥ ૩.૪.૧૬॥

ॐ ઊર્ધ્વરેતસ્સુ ચ શબ્દે હિ ॐ ॥ ૩.૪.૧૭॥

ॐ પરામર્શં જૈમિનિરચોદના ચાપવદિતિ હિ ॐ ॥ ૩.૪.૧૮॥

ॐ અનુષ્ઠેયં બાદરાયણઃ સામ્યશ્રુતેઃ ॐ ॥ ૩.૪.૧૯॥

ॐ વિધિર્વા ધારણવત્ ॐ ॥ ૩.૪.૨૦॥

ॐ સ્તુતિમાત્રમુપાદાનાદિતિ ચેન્નાપૂર્વત્વાત્ ॐ ॥ ૩.૪.૨૧॥

ॐ ભાવશબ્દાચ્ચ ॐ ॥ ૩.૪.૨૨॥

ॐ પારિપ્લવાર્થા ઇતિ ચેન્ન વિશેષિતત્વાત્ ॐ ॥ ૩.૪.૨૩॥

ॐ તથા ચૈકવાક્યોપબન્ધાત્ ॐ ॥ ૩.૪.૨૪॥

ॐ અત એવ ચાગ્નીન્ધનાદ્યનપેક્ષા ॐ ॥ ૩.૪.૨૫॥

ॐ સર્વાપેક્ષા ચ યજ્ઞાદિશ્રુતેઃ અશ્વવત્ ॐ ॥ ૩.૪.૨૬॥

ॐ શમદમાદ્યુપેતઃ સ્યાત્તથાઽપિ તુ તદ્વિધેસ્તદઙ્ગતયા
તેષામવશ્યાનુષ્ઠેયત્વાત્ ॐ ॥ ૩.૪.૨૭॥

ॐ સર્વાન્નાનુમતિશ્ચ પ્રાણાત્યયે તદ્દર્શનાત્ ॐ ॥ ૩.૪.૨૮॥

ॐ અબાધાચ્ચ ॐ ॥ ૩.૪.૨૯॥

ॐ અપિ સ્મર્યતે ॐ ॥ ૩.૪.૩૦॥

ॐ શબ્દશ્ચાતોઽકામચારે ॐ ॥ ૩.૪.૩૧॥

ॐ વિહિતત્વાચ્ચાશ્રમકર્માપિ ॐ ॥ ૩.૪.૩૨॥

ॐ સહકારિત્વેન ચ ॐ ॥ ૩.૪.૩૩॥

ॐ સર્વથાપિ તુ ત એવોભયલિઙ્ગાત્ ॐ ॥ ૩.૪.૩૪॥

ॐ અનભિભવં ચ દર્શયતિ ॐ ॥ ૩.૪.૩૫॥

ॐ અન્તરા ચાપિ તુ તદ્દૃષ્ટેઃ ॐ ॥ ૩.૪.૩૬॥

ॐ અપિ સ્મર્યતે ॐ ॥ ૩.૪.૩૭॥

ॐ વિશેષાનુગ્રહં ચ ॐ ॥ ૩.૪.૩૮॥

ॐ અતસ્ત્વિતરજ્જ્યાયો લિઙ્ગાચ્ચ ॐ ॥ ૩.૪.૩૯॥

ॐ તદ્ભૂતસ્ય તુ તદ્ભાવો જૈમિનેરપિ
નિયમાતદ્રૂપાઽભાવેભ્યઃ ॐ ॥ ૩.૪.૪૦॥

ॐ ન ચાધિકારિકમપિ પતનાનુમાનાત્તદયોગાત્ ॐ ॥ ૩.૪.૪૧॥

ॐ ઉપપૂર્વમપીત્યેકે ભાવશમનવત્તદુક્તમ્ ॐ ॥ ૩.૪.૪૨॥

ॐ બહિસ્તૂભયથાપિ સ્મૃતેરાચારાચ્ચ ॐ ॥ ૩.૪.૪૩॥

ॐ સ્વામિનઃ શ્રુતેરિત્યાત્રેયઃ ॐ ॥ ૩.૪.૪૪॥

ॐ આર્ત્વિજ્યમિત્યૌડુલોમિઃ તસ્મૈ હિ પરિક્રિયતે ॐ ॥ ૩.૪.૪૫॥

ॐ સહકાર્યન્તરવિધિઃ પક્ષેણ તૃતીયં તદ્વતો
વિધ્યાદિવત્ ॐ ॥ ૩.૪.૪૬॥

પાઠભેદ શ્રુતેશ્ચ added to 3.4.46

ॐ કૃત્સ્નભાવાત્તુ ગૃહિણોપસંહારઃ ॐ ॥ ૩.૪.૪૭॥

ॐ મૌનવદિતરેષામપ્યુપદેશાત્ ॐ ॥ ૩.૪.૪૮॥

ॐ અનાવિષ્કુર્વન્નન્વયાત્ ॐ ॥ ૩.૪.૪૯॥

ॐ ઐહિકમપ્રસ્તુતપ્રતિબન્ધે તદ્દર્શનાત્ ॐ ॥ ૩.૪.૫૦॥

ॐ એવં મુક્તિફલાનિયમસ્તદવસ્થાવધૃતેસ્તદવસ્થાવધૃતેઃ ॐ ॥ ૩.૪.૫૧॥

ઇતિ શ્રીમત્કૃષ્ણદ્વૈપાયનકૃતબ્રહ્મસૂત્રેષુ
તૃતીયાધ્યાયસ્ય ચતુર્થઃ પાદઃ સમાપ્તઃ
॥ ઇતિ તૃતીયોઽધ્યાયઃ॥

## ॥ અથ ચતુર્થોઽધ્યાયઃ॥

ॐ આવૃત્તિઃ અસકૃદુપદેશાત્ ॐ ॥ ૪.૧.૧॥

ॐ લિઙ્ગાચ્ચ ॐ ॥ ૪.૧.૨॥

ॐ આત્મેતિ તૂપગચ્છન્તિ ગ્રાહયન્તિ ચ ॐ ॥ ૪.૧.૩॥

ॐ ન પ્રતીકે ન હિ સઃ ॐ ॥ ૪.૧.૪॥

ૐ બ્રહ્મદૃષ્ટિરુત્કર્ષાત્ ૐ ॥ ૪.૧.૫॥

ૐ આદિત્યાદિમતયશ્ચાઙ્ગ ઉપપત્તેઃ ૐ ॥ ૪.૧.૬॥

ૐ આસીનસ્સમ્ભવાત્ ૐ ॥ ૪.૧.૭॥

ૐ ધ્યાનાચ્ચ ૐ ॥ ૪.૧.૮॥

ૐ અચલત્વં ચાપેક્ષ્ય ૐ ॥ ૪.૧.૯॥

ૐ સ્મરન્તિ ચ ૐ ॥ ૪.૧.૧૦॥

ૐ યત્રૈકાગ્રતા તત્રાવિશેષાત્ ૐ ॥ ૪.૧.૧૧॥

ૐ આ પ્રાયણાત્તત્રાપિ હિ દૃષ્ટમ્ ૐ ॥ ૪.૧.૧૨॥

ૐ તદધિગમ ઉત્તરપૂર્વાઘયોરશ્લેષવિનાશૌ
તદ્વ્યપદેશાત્ ૐ ॥ ૪.૧.૧૩॥

ૐ ઇતરસ્યાપ્યેવમસંશ્લેષઃ પાતે તુ ૐ ॥ ૪.૧.૧૪॥

ૐ અનારબ્ધકાર્યે એવ તુ પૂર્વે તદવધેઃ ૐ ॥ ૪.૧.૧૫॥

ૐ અગ્નિહોત્રાદિ તુ તત્કાર્યાયૈવ તદ્દર્શનાત્ ૐ ॥ ૪.૧.૧૬॥

ૐ અતોઽન્યદપીત્યેકેષામુભયોઃ ૐ ॥ ૪.૧.૧૭॥

ૐ યદેવ વિદ્યયેતિ હિ ૐ ॥ ૪.૧.૧૮॥

ૐ ભાગેન ત્વિતરે ક્ષપયિત્વા સમ્પત્સ્યતે ૐ ॥ ૪.૧.૧૯॥

ઇતિ શ્રીમત્કૃષ્ણદ્વૈપાયનકૃતબ્રહ્મસૂત્રેષુ

## ચતુર્થાધ્યાયસ્ય પ્રથમઃ પાદઃ સમાપ્તઃ

ૐ વાઙ્ગ્મનસિ દર્શનાચ્છબ્દાચ્ચ ૐ ॥ ૪.૨.૧॥

ૐ અત એવ ચ સર્વાણ્યનુ ૐ ॥ ૪.૨.૨॥

ૐ તન્મનઃ પ્રાણ ઉત્તરાત્ ૐ ॥ ૪.૨.૩॥

ૐ સોઽધ્યક્ષે તદુપગમાદિભ્યઃ ૐ ॥ ૪.૨.૪॥

ૐ ભૂતેષુ તચ્છ્રુતેઃ ૐ ॥ ૪.૨.૫॥

ૐ નૈકસ્મિન્ દર્શયતો હિ ૐ ॥ ૪.૨.૬॥

ૐ સમાના ચાસૃત્યુપક્રમાદમૃતત્વં ચાનુપોષ્ય ૐ ॥ ૪.૨.૭॥

ૐ તદપીતેઃ સંસારવ્યપદેશાત્ ૐ ॥ ૪.૨.૮॥

ૐ સૂક્ષ્મં પ્રમાણતશ્ચ તથોપલબ્ધેઃ ૐ ॥ ૪.૨.૯॥

ૐ નોપમર્દેનાતઃ ૐ ॥ ૪.૨.૧૦॥

ૐ અસ્યૈવ ચોપપત્તેરૂષ્મા ૐ ॥ ૪.૨.૧૧॥

ૐ પ્રતિષેધાદિતિ ચેન્ન શારીરાત્ ૐ ॥ ૪.૨.૧૨॥

ૐ સ્પષ્ટો હ્યેકેષામ્ ૐ ॥ ૪.૨.૧૩॥

ૐ સ્મર્યતે ચ ૐ ॥ ૪.૨.૧૪॥

ૐ તાનિ પરે તથા હ્યાહ ૐ ॥ ૪.૨.૧૫॥

ૐ અવિભાગો વચનાત્ ૐ ॥ ૪.૨.૧૬॥

ૐ તદોકોऽગ્રજ્વલનં તત્પ્રકાશિતદ્વારો
વિદ્યાસામર્થ્યાત્તચ્છેષગત્યનુસ્મૃતિયોગાચ્ચ હાર્દાનુગૃહીતાઃ
શતાધિકયા ૐ ॥ ૪.૨.૧૭॥

ૐ રશ્મ્યનુસારી ૐ ॥ ૪.૨.૧૮॥

ૐ નિશિ નેતિ ચેન્ન સંભન્ધાત્ ૐ ॥ ૪.૨.૧૯॥

પાઠભેદ 4.2.19 and 20 combined

ૐ યાવદ્દેહભાવિત્વાદ્દર્શયતિ ચ ૐ ॥ ૪.૨.૨૦॥

ૐ અતશ્ચાયનેऽપિ દક્ષિણે ૐ ॥ ૪.૨.૨૧॥

ૐ યોગિનઃ પ્રતિ સ્મર્યતે સ્માર્તે ચૈતે ૐ ॥ ૪.૨.૨૨॥

ઇતિ શ્રીમત્કૃષ્ણદ્વૈપાયનકૃતબ્રહ્મસૂત્રેષુ

## ચતુર્થાધ્યાયસ્ય દ્વિતીયઃ પાદઃ સમાપ્તઃ

ૐ અર્ચિરાદિના તત્પ્રથિતેઃ ૐ ॥ ૪.૩.૧॥

ૐ વાયુશબ્દાદવિશેષવિશેષાભ્યામ્ ૐ ॥ ૪.૩.૨॥

ૐ તટિતોऽધિ વરુણઃ સંબન્ધાત્ ૐ ॥ ૪.૩.૩॥

ॐ આતિવાહિકસ્તલ્લિઙ્ગાત્ ॐ ॥ ૪.૩.૪॥

ॐ ઉભયવ્યામોહાત્તત્સિદ્ધેઃ ॐ ॥ ૪.૩.૫॥

ॐ વૈદ્યુતેનૈવ તતસ્તચ્છ્રુતેઃ ॐ ॥ ૪.૩.૬॥

ॐ કાર્યં બાદરિરસ્ય ગત્યુપપત્તેઃ ॐ ॥ ૪.૩.૭॥

ॐ વિશેષિતત્વાચ્ચ ॐ ॥ ૪.૩.૮॥

ॐ સામીપ્યાત્તુ તદ્વ્યપદેશઃ ॐ ॥ ૪.૩.૯॥

ॐ કાર્યાત્યયે તદધ્યક્ષેણ સહાતઃ પરમભિધાનાત્ ॐ ॥ ૪.૩.૧૦॥

ॐ સ્મૃતેશ્ચ ॐ ॥ ૪.૩.૧૧॥

ॐ પરં જૈમિનિર્મુખ્યત્વાત્ ॐ ॥ ૪.૩.૧૨॥

ॐ દર્શનાચ્ચ ॐ ॥ ૪.૩.૧૩॥

ॐ ન ચ કાર્યે પ્રતિપત્ત્યભિસન્ધિઃ ॐ ॥ ૪.૩.૧૪॥

ॐ અપ્રતીકાલમ્બનાન્નયતીતિ બાદરાયણઉભયથા ચ
દોષાત્ તત્ક્રતુશ્ચ ॐ ॥ ૪.૩.૧૫॥

ॐ વિશેષં ચ દર્શયતિ ॐ ॥ ૪.૩.૧૬॥

ઇતિ શ્રીમત્કૃષ્ણદ્વૈપાયનકૃતબ્રહ્મસૂત્રેષુ

## ચતુર્થાધ્યાયસ્ય તૃતીયઃ પાદઃ સમાપ્તઃ

ॐ સમ્પદ્યાવિહાય સ્વેનશબ્દાત્ ॐ ॥ ૪.૪.૧॥

ॐ મુક્તઃ પ્રતિજ્ઞાનાત્ ॐ ॥ ૪.૪.૨॥

ॐ આત્મા પ્રકરણાત્ ॐ ॥ ૪.૪.૩॥

ॐ અવિભાગેન દૃષ્ટત્વાત્ ॐ ॥ ૪.૪.૪॥

ॐ બ્રાહ્મેણ જૈમિનિરુપન્યાસાદિભ્યઃ ॐ ॥ ૪.૪.૫॥

ॐ ચિતિમાત્રેણ તદાત્મકત્વાદિત્યૌડુલોમિઃ ॐ ॥ ૪.૪.૬॥

ॐ એવમપ્યુપન્યાસાત્પૂર્વભાવાદવિરોધં બાદરાયણઃ ॐ ॥ ૪.૪.૭॥

ॐ સઙ્કલ્પાદેવ ચ તચ્છ્રુતેઃ ॐ ॥ ૪.૪.૮॥

ॐ અત એવ ચાનન્યાધિપતિઃ ॐ ॥ ૪.૪.૯ ॥

ॐ અભાવં બાદરિરાહ હ્યેવમ્ ॐ ॥ ૪.૪.૧૦ ॥

ॐ ભાવં જૈમિનિર્વિકલ્પામ્નાનાત્ ॐ ॥ ૪.૪.૧૧ ॥

ॐ દ્વાદશાહવદુભયવિધં બાદરાયણોઽતઃ ॐ ॥ ૪.૪.૧૨ ॥

ॐ તન્વભાવે સન્ધ્યવદુપપત્તેઃ ॐ ॥ ૪.૪.૧૩ ॥

ॐ ભાવે જાગ્રદ્વત્ ॐ ॥ ૪.૪.૧૪ ॥

ॐ પ્રદીપવદાવેશઃ તથા હિ દર્શયતિ ॐ ॥ ૪.૪.૧૫ ॥

ॐ સ્વાપ્યયસમ્પત્ત્યોરન્યતરાપેક્ષમાવિષ્કૃતં હિ ॐ ॥ ૪.૪.૧૬ ॥

ॐ જગદ્વ્યાપારવર્જમ્ ॐ ॥ ૪.૪.૧૭ ॥

પાઠભેદ 4.4.17 and 18 combined

ॐ પ્રકરણાદસન્નિહિતત્વાચ્ચ ॐ ॥ ૪.૪.૧૮ ॥

ॐ પ્રત્યક્ષોપદેશાદિતિ ચેન્નાધિકારિકમણ્ડલસ્થોક્તેઃ ॐ ॥ ૪.૪.૧૯ ॥

ॐ વિકારાવર્તિ ચ તથા હિ દર્શયતિ ॐ ॥ ૪.૪.૨૦ ॥

ॐ સ્થિતિમાહ દર્શયતશ્ચૈવં પ્રત્યક્ષાનુમાને ॐ ॥ ૪.૪.૨૧ ॥

ॐ ભોગમાત્રસામ્યલિઙ્ગાચ્ચ ॐ ॥ ૪.૪.૨૨ ॥

ॐ અનાવૃત્તિઃ શબ્દાદનાવૃત્તિઃ શબ્દાત્ ॐ ॥ ૪.૪.૨૩ ॥

ઇતિ શ્રીમત્કૃષ્ણદ્વૈપાયનકૃતબ્રહ્મસૂત્રેષુ
ચતુર્થાધ્યાયસ્ય ચતુર્થઃ પાદઃ સમાપ્તઃ
॥ ઇતિ ચતુર્થોઽધ્યાયઃ ॥

ભારતીરમણમુખ્યપ્રાણાન્તર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ

Encoded and proofread by Shrisha Rao

Corrected by Dima Muzhetsky dimamuzhetsky at yahoo.com

*Brahmasutra*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*